श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ षड्विंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षड्विंशत्यधिकशततमः सर्गः ॥

## हनुमता भरतं प्रति श्रीरामलक्ष्मणसीताकर्तृकवनवाससम्बन्धिनां समेषां वृत्तानां श्रावणम्

बहूनि नाम वर्षाणि गतस्य सुमहद्वनम्।
शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनम्॥ **6.126.1** ॥

कल्याणी बत गाथेयं लौकिकी प्रतिभाति माम्।
एति जीवन्तमानन्दो नरं वर्षशतादपि॥ **6.126.2** ॥

राघवस्य हरीणां च कथमासीत् समागमः।
कस्मिन् देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः॥ **6.126.3** ॥

स पृष्टो राजपुत्रेण बृस्यां समुपवेशितः।
आचचक्षे ततः सर्वं रामस्य चरितं वने॥ **6.126.4** ॥

यथा प्रव्राजितो रामो मातुर्दत्तौ वरौ तव।
यथा च पुत्रशोकेन राजा दशरथो मृतः॥ **6.126.5** ॥

यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात् प्रभो।
त्वयायोध्यां प्रविष्टेन यथा राज्यं न चेप्सितम्॥ **6.126.6** ॥

चित्रकूटगिरिं गत्वा राज्येनामित्रकर्शनः।
निमन्त्रितस्त्वया भ्राता धर्ममाचरता सताम्॥ **6.126.7** ॥

स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम्।
आर्यस्य पादुके गृह्य यथासि पुनरागतः॥ **6.126.8** ॥

सर्वमेतन्महाबाहो यथावद् विदितं तव।
त्वयि प्रतिप्रयाते तु यद् वृत्तं तन्निबोध मे॥ **6.126.9** ॥

अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजम्।
परिद्यूनमिवात्यर्थं तद् वनं समपद्यत॥ **6.126.10** ॥

तद्धस्तिमृदितं घोरं सिंहव्याघ्रमृगाकुलम्।
प्रविवेशाथ विजनं स महद् दण्डकावनम्॥ **6.126.11** ॥

तेषां पुरस्ताद् बलवान् गच्छतां गहने वने।
विनदन् सुमहानादं विराधः प्रत्यदृश्यत॥ **6.126.12** ॥

तमुत्क्षिप्य महानादमूर्ध्वबाहुमधोमुखम्।
निखाते प्रक्षिपन्ति स्म नदन्तमिव कुञ्जरम्॥ **6.126.13** ॥

तत् कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ।
सायाह्ने शरभङ्गस्य रम्यमाश्रममीयतुः॥ **6.126.14** ॥

शरभङ्गे दिवं प्राप्ते रामः सत्यपराक्रमः।
अभिवाद्य मुनीन् सर्वाञ्जनस्थानमुपागमत्॥ **6.126.15** ॥

पश्चाच्छूर्पणखा नाम रामपार्श्वमुपागता।
ततो रामेण सन्दिष्टो लक्ष्मणः सहसोत्थितः॥ **6.126.16** ॥

प्रगृह्य खड्गं चिच्छेद कर्णनासं महाबलः।
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्॥ **6.126.17** ॥

हतानि वसता तत्र राघवेण महात्मना।
एकेन सह सङ्गम्य रामेण रणमूर्धनि॥ **6.126.18** ॥

अह्नश्चतुर्थभागेन निःशेषा राक्षसाः कृताः।
महाबला महावीर्यास्तपसो विघ्नकारिणः ॥ **6.126.19** ॥

निहता राघवेणाजौ दण्डकारण्यवासिनः।
राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे ॥ **6.126.20** ॥

दूषणं चाग्रतो हत्वा त्रिशिरास्तदनन्तरम्।
ततस्तेनार्दिता बाला रावणं समुपागता ॥ **6.126.21** ॥

रावणानुचरो घोरो मारीचो नाम राक्षसः।
लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः ॥ **6.126.22** ॥

सा राममब्रवीद् दृष्ट्वा वैदेही गृह्यतामिति।
अयं मनोहरः कान्त आश्रमो नो भविष्यति ॥ **6.126.23** ॥

ततो रामो धनुष्पाणिर्मृगं तमनुधावति।
स तं जघान धावन्तं शरेणानतपर्वणा ॥ **6.126.24** ॥

अथ सौम्य दशग्रीवो मृगं याति तु राघवे।
लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा ॥ **6.126.25** ॥

जग्राह तरसा सीतां ग्रहः खे रोहिणीमिव।
त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम् ॥ **6.126.26** ॥

प्रगृह्य सहसा सीतां जगामाशु स राक्षसः।
ततस्त्वद्भुतसङ्काशाः स्थिताः पर्वतमूर्धनि ॥ **6.126.27** ॥

सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः।
ददृशुर्विस्मिताकारा रावणं राक्षसाधिपम् ॥ **6.126.28** ॥

ततः शीघ्रतरं गत्वा तद् विमानं मनोजवम्।
आरुह्य सह वैदेह्या पुष्पकं स महाबलः ॥ **6.126.29** ॥

प्रविवेश तदा लङ्कां रावणो राक्षसेश्वरः।
तां सुवर्णपरिष्कारे शुभे महति वेश्मनि॥ **6.126.30** ॥

प्रवेश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः।
तृणवद् भाषितं तस्य तं च नैर्ऋतपुङ्गवम्॥ **6.126.31** ॥

अचिन्तयन्ती वैदेही ह्यशोकवनिकां गता।
न्यवर्तत तदा रामो मृगं हत्वा तदा वने॥ **6.126.32** ॥

निवर्तमानः काकुत्स्थो दृष्ट्वा गृध्रं स विव्यथे।
गृध्रं हतं तदा दृष्ट्वा रामः प्रियतरं पितुः॥ **6.126.33** ॥

मार्गमाणस्तु वैदेहीं राघवः सहलक्ष्मणः।
गोदावरीमनुचरन् वनोद्देशांश्च पुष्पितान्॥ **6.126.34** ॥

आसेदतुर्महारण्ये कबन्धं नाम राक्षसम्।
ततः कबन्धवचनाद् रामः सत्यपराक्रमः॥ **6.126.35** ॥

ऋष्यमूकगिरिं गत्वा सुग्रीवेण समागतः।
तयोः समागमः पूर्वं प्रीत्या हार्दो व्यजायत॥ **6.126.36** ॥

भ्रात्रा निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा।
इतरेतरसंवादात् प्रगाढः प्रणयस्तयोः॥ **6.126.37** ॥

रामः स्वबाहुवीर्येण स्वराज्यं प्रत्यपादयत्।
वालिनं समरे हत्वा महाकायं महाबलम्॥ **6.126.38** ॥

सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः।
रामाय प्रतिजानीते राजपुत्र्यास्तु मार्गणम्॥ **6.126.39** ॥

आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना।
दश कोट्यः प्लवङ्गानां सर्वाः प्रस्थापिता दिशः॥ **6.126.40** ॥

तेषां नो विप्रकृष्टानां विन्ध्ये पर्वतसत्तमे।
भृशं शोकाभितप्तानां महान् कालोऽत्यवर्तत॥ **6.126.41** ॥

भ्राता तु गृध्रराजस्य सम्पातिर्नाम वीर्यवान्।
समाख्याति स्म वसतीं सीतां रावणमन्दिरे॥ **6.126.42** ॥

सोऽहं दुःखपरीतानां दुःखं तज्ज्ञातिनां नुदन्।
आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः।
तत्राहमेकामद्राक्षमशोकवनिकां गताम्॥ **6.126.43** ॥

कौशेयवस्त्रां मलिनां निरानन्दां दृढव्रताम्।
तया समेत्य विधिवत् पृष्ट्वा सर्वमनिन्दिताम्॥ **6.126.44** ॥

अभिज्ञानं मया दत्तं रामनामाङ्गुलीयकम्।
अभिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः॥ **6.126.45** ॥

मया च पुनरागम्य रामस्याक्लिष्टकर्मणः।
अभिज्ञानं मया दत्तमर्चिष्मान् स महामणिः॥ **6.126.46** ॥

श्रुत्वा तां मैथिलीं रामस्त्वाशशंसे च जीवितम्।
जीवितान्तमनुप्राप्तः पीत्वामृतमिवातुरः॥ **6.126.47** ॥

उद्योजयिष्यन्नुद्योगं दध्रे लङ्कावधे मनः।
जिघांसुरिव लोकान्ते सर्वान् लोकान् विभावसुः॥ **6.126.48** ॥

ततः समुद्रमासाद्य नलं सेतुमकारयत्।
अतरत् कपिवीराणां वाहिनी तेन सेतुना॥ **6.126.49** ॥

प्रहस्तमवधीन्नीलः कुम्भकर्णं तु राघवः।
लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणम्॥ **6.126.50** ॥

स शक्रेण समागम्य यमेन वरुणेन च।
महेश्वरस्वयम्भूभ्यां तथा दशरथेन च॥ **6.126.51** ॥

तैश्च दत्तवरः श्रीमानृषिभिश्च समागतैः।
सुरर्षिभिश्च काकुत्स्थो वरान् लेभे परन्तपः॥ **6.126.52** ॥

स तु दत्तवरः प्रीत्या वानरैश्च समागतैः।
पुष्पकेण विमानेन किष्किन्धामभ्युपागमत्॥ **6.126.53** ॥

तां गङ्गां पुनरासाद्य वसन्तं मुनिसन्निधौ।
अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि॥ **6.126.54** ॥

ततः स वाक्यैर्मधुरैर्हनूमतो
    निशम्य हृष्टो भरतः कृताञ्जलिः।
उवाच वाणीं मनसः प्रहर्षिणीं
    चिरस्य पूर्णः खलु मे मनोरथः॥ **6.126.55** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
षड्विंशत्यधिकशततमः सर्गः॥